# Ribhuproktam Brahmaiva Sarvam Prakarananirupanam

# ઋભુપ્રોક્તં બ્રહ્મૈવ સર્વં પ્રકરણનિરૂપણમ્

## Document Information

Text title : Ribhuproktam Brahmaiva Sarvam Prakarananirupanam

File name : RRibhuproktaMbrahmaivasarvaMprakaraNanirUpaNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 15 | 1-61||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ઋભુપ્રોક્તં બ્રહ્મૈવ સર્વં પ્રકરણનિરૂપણમ્

(સર્વં બ્રહ્મૈવ કેવલમ્)

મહારહસ્યં વક્ષ્યામિ ગુહ્યાદ્ગુહ્યતરં પુનઃ ।
અત્યન્તદુર્લભં લોકે સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૧॥

બ્રહ્મમાત્રમિદં સર્વં બ્રહ્મમાત્રમસન્ન હિ ।
બ્રહ્મમાત્રં શ્રુતં સર્વં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૨॥

બ્રહ્મમાત્રં મહાયન્ત્રં બ્રહ્મમાત્રં ક્રિયાફલમ્ ।
બ્રહ્મમાત્રં મહાવાક્યં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૩॥

બ્રહ્મમાત્રં જગત્સર્વં બ્રહ્મમાત્રં જડાજડમ્ ।
બ્રહ્મમાત્રં પરં દેહં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૪॥

બ્રહ્મમાત્રં ગુણં પ્રોક્તં બ્રહ્મમાત્રમહં મહત્ ।
બ્રહ્મમાત્રં પરં બ્રહ્મ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૫॥

બ્રહ્મમાત્રમિદં વસ્તુ બ્રહ્મમાત્રં સ ચ પુમાન્ ।
બ્રહ્મમાત્રં ચ યત્કિઞ્ચિત્સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૬॥

બ્રહ્મમાત્રમનન્તાત્મા બ્રહ્મમાત્રં પરં સુખમ્ ।
બ્રહ્મમાત્રં પરં જ્ઞાનં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૭॥

બ્રહ્મમાત્રં પરં પારં બ્રહ્મમાત્રં પુરત્રયમ્ ।
બ્રહ્મમાત્રમનેકત્વં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૮॥

બ્રહ્મૈવ કેવલં ગન્ધં બ્રહ્મૈવ પરમં પદમ્ ।
બ્રહ્મૈવ કેવલં ઘ્રાણં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૯॥

બ્રહ્મૈવ કેવલં સ્પર્શં શબ્દં બ્રહ્મૈવ કેવલમ્ ।
બ્રહ્મૈવ કેવલં રૂપં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૧૦॥

બ્રહ્મૈવ કેવલં લોકં રસો બ્રહ્મૈવ કેવલમ્ ।

બ્રહ્મૈવ કેવલં ચિત્તં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૧૧॥

તત્પદં ચ સદા બ્રહ્મ ત્વં પદં બ્રહ્મ એવ હિ ।
અસીત્યેવ પદં બ્રહ્મ બ્રહ્મૈક્યં કેવલં સદા (સર્વં બ્રહ્મૈવ કેવલં) ॥ ૧૫.૧૨॥

બ્રહ્મૈવ કેવલં ગુહ્યં બ્રહ્મ બાહ્યં ચ કેવલમ્ ।
બ્રહ્મૈવ કેવલં નિત્યં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૧૩॥

બ્રહ્મૈવ તજ્જલાનીતિ જગદાદ્યન્તયોઃ સ્થિતિઃ ।
બ્રહ્મૈવ જગદાદ્યન્તં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૧૪॥

બ્રહ્મૈવ ચાસ્તિ નાસ્તીતિ બ્રહ્મૈવાહં ન સંશયઃ ।
બ્રહ્મૈવ સર્વં યત્કિઞ્ચિત્સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૧૫॥

બ્રહ્મૈવ જાગ્રત્સર્વં હિ બ્રહ્મમાત્રમહં પરમ્ ।
બ્રહ્મૈવ સત્યમસ્તિત્વં બ્રહ્મૈવ તુર્યમુચ્યતે ॥ ૧૫.૧૬॥

બ્રહ્મૈવ સત્તા બ્રહ્મૈવ બ્રહ્મૈવ ગુરુભાવનમ્ ।
બ્રહ્મૈવ શિષ્યસદ્ભાવં મોક્ષં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૧૭॥

પૂર્વાપરં ચ બ્રહ્મૈવ પૂર્ણં બ્રહ્મ સનાતનમ્ ।
બ્રહ્મૈવ કેવલં સાક્ષાત્સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૧૮॥

બ્રહ્મ સચ્ચિત્સુખં બ્રહ્મ પૂર્ણં બ્રહ્મ સનાતનમ્ ।
બ્રહ્મૈવ કેવલં સાક્ષાત્સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૧૯॥

બ્રહ્મૈવ કેવલં સચ્ચિત્સુખં બ્રહ્મૈવ કેવલમ્ ।
આનન્દં બ્રહ્મ સર્વત્ર પ્રિયરૂપમવસ્થિતમ્ ॥ ૧૫.૨૦॥

શુભવાસનયા જીવં શિવવદ્ભાતિ સર્વદા ।
પાપવાસનયા જીવો નરકં ભોજ્યવત્ (ભોક્તુમિચ્છતીતિ) સ્થિતમ્ ॥ ૧૫.૨૧॥

બ્રહ્મૈવેન્દ્રિયવદ્ભાનં બ્રહ્મૈવ વિષયાદિવત્ ।
બ્રહ્મૈવ વ્યવહારશ્ચ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૨૨॥

બ્રહ્મૈવ સર્વમાનન્દં બ્રહ્મૈવ જ્ઞાનવિગ્રહમ્ ।
બ્રહ્મૈવ માયાકાર્યાખ્યં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૨૩॥

બ્રહ્મૈવ યજ્ઞસન્ધાનં બ્રહ્મૈવ હૃદયામ્બરમ્ ।
બ્રહ્મૈવ મોક્ષસારાખ્યં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૨૪॥

બ્રહ્મૈવ શુદ્ધાશુદ્ધં ચ સર્વં બ્રહ્મૈવ કારણમ્ ।
બ્રહ્મૈવ કાર્યં ભૂલોકં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૨૫॥

બ્રહ્મૈવ નિત્યતૃપ્તાત્મા બ્રહ્મૈવ સકલં દિનમ્ ।
બ્રહ્મૈવ તૂષ્ણીં ભૂતાત્મા સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૨૬॥

બ્રહ્મૈવ વેદસારાર્થઃ બ્રહ્મૈવ ધ્યાનગોચરમ્ ।
બ્રહ્મૈવ યોગયોગાખ્યં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૨૭॥

નાનારૂપત્વાદ્બ્રહ્મ ઉપાધિત્વેન દૃશ્યતે ।
માયામાત્રમિતિ જ્ઞાત્વા વસ્તુતો નાસ્તિ તત્ત્વતઃ ॥ ૧૫.૨૮॥

બ્રહ્મૈવ લોકવદ્ભાતિ બ્રહ્મૈવ જનવત્તથા ।
બ્રહ્મૈવ રૂપવદ્ભાતિ વસ્તુતો નાસ્તિ કિઞ્ચન ॥ ૧૫.૨૯॥

બ્રહ્મૈવ દેવતાકારં બ્રહ્મૈવ મુનિમણ્ડલમ્ ।
બ્રહ્મૈવ ધ્યાનરૂપં ચ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૩૦॥

બ્રહ્મૈવ જ્ઞાનવિજ્ઞાનં બ્રહ્મૈવ પરમેશ્વરઃ ।
બ્રહ્મૈવ શુદ્ધબુદ્ધાત્મા સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૩૧॥

બ્રહ્મૈવ પરમાનદં બ્રહ્મૈવ વ્યાપકં મહત્ ।
બ્રહ્મૈવ પરમાર્થં ચ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૩૨॥

બ્રહ્મૈવ યજ્ઞરૂપં ચ બ્રહ્મ હવ્યં ચ કેવલમ્ ।
બ્રહ્મૈવ જીવભૂતાત્મા સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૩૩॥

બ્રહ્મૈવ સકલં લોકં બ્રહ્મૈવ ગુરુશિષ્યકમ્ ।
બ્રહ્મૈવ સર્વસિદ્ધિં ચ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૩૪॥

બ્રહ્મૈવ સર્વમન્ત્રં ચ બ્રહ્મૈવ સકલં જપમ્ ।
બ્રહ્મૈવ સર્વકાર્યં ચ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૩૫॥

બ્રહ્મૈવ સર્વશાન્તત્વં બ્રહ્મૈવ હૃદયાન્તરમ્ ।
બ્રહ્મૈવ સર્વકૈવલ્યં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૩૬॥

બ્રહ્મૈવાક્ષરભાવઞ્ચ બ્રહ્મૈવાક્ષરલક્ષણમ્ ।
બ્રહ્મૈવ બ્રહ્મરૂપઞ્ચ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૩૭॥

બ્રહ્મૈવ સત્યભવનં બ્રહ્મૈવાહં ન સંશયઃ ।
બ્રહ્મૈવ તત્પદાર્થઞ્ચ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૩૮॥

બ્રહ્મૈવાહમ્પદાર્થઞ્ચ બ્રહ્મૈવ પરમેશ્વરઃ ।
બ્રહ્મૈવ ત્વમ્પદાર્થઞ્ચ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૩૯॥

બ્રહ્મૈવ યદ્યત્પરમં બ્રહ્મૈવેતિ પરાયણમ્ ।
બ્રહ્મૈવ કલનાભાવં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૪૦॥

બ્રહ્મ સર્વં ન સન્દેહો બ્રહ્મૈવ ત્વં સદાશિવઃ ।
બ્રહ્મૈવેદં જગત્સર્વં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૪૧॥

બ્રહ્મૈવ સર્વસુલભં બ્રહ્મૈવાત્મા સ્વયં સ્વયમ્ ।
બ્રહ્મૈવ સુખમાત્રત્વાત્સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૪૨॥

બ્રહ્મૈવ સર્વં બ્રહ્મૈવ બ્રહ્મણોઽન્યદસત્સદા ।
બ્રહ્મૈવ બ્રહ્મમાત્રાત્મા સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૪૩॥

બ્રહ્મૈવ સર્વવાક્યાર્થઃ બ્રહ્મૈવ પરમં પદમ્ ।
બ્રહ્મૈવ સત્યાસત્યં ચ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૪૪॥

બ્રહ્મૈવૈકમનાદ્યન્તં બ્રહ્મૈવૈકં ન સંશયઃ ।
બ્રહ્મૈવૈકં ચિદાનન્દઃ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૪૫॥

બ્રહ્મૈવૈકં સુખં નિત્યં બ્રહ્મૈવૈકં પરાયણમ્ ।
બ્રહ્મૈવૈકં પરં બ્રહ્મ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૪૬॥

બ્રહ્મૈવ ચિત્સ્વયં સ્વસ્થં બ્રહ્મૈવ ગુણવર્જિતમ્ ।
બ્રહ્મૈવાત્યન્તિકં સર્વં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૪૭॥

બ્રહ્મૈવ નિર્મલં સર્વં બ્રહ્મૈવ સુલભં સદા ।
બ્રહ્મૈવ સત્યં સત્યાનાં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૪૮॥

બ્રહ્મૈવ સૌખ્યં સૌખ્યં ચ બ્રહ્મૈવાહં સુખાત્મકમ્ ।
બ્રહ્મૈવ સર્વદા પ્રોક્તં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૪૯॥

બ્રહ્મૈવમખિલં બ્રહ્મ બ્રહ્મૈકં સર્વસાક્ષિકમ્ ।
બ્રહ્મૈવ ભૂરિભવનં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૫૦॥

બ્રહ્મૈવ પરિપૂર્ણાત્મા બ્રહ્મૈવં સારમવ્યયમ્ ।
બ્રહ્મૈવ કારણં મૂલં બ્રહ્મૈવૈકં પરાયણમ્ ॥ ૧૫.૫૧॥

બ્રહ્મૈવ સર્વભૂતાત્મા બ્રહ્મૈવ સુખવિગ્રહમ્ ।

બ્રહ્મૈવ નિત્યતૃપ્તાત્મા સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૫૨॥

બ્રહ્મૈવાદ્વૈતમાત્રાત્મા બ્રહ્મૈવાકાશવત્પ્રભુઃ ।
બ્રહ્મૈવ હૃદયાનન્દઃ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૫૩॥

બ્રહ્મણોઽન્યત્પરં નાસ્તિ બ્રહ્મણોઽન્યજ્જગન્ન ચ ।
બ્રહ્મણોઽન્યદહં નાહં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૫૪॥

બ્રહ્મૈવાન્યસુખં નાસ્તિ બ્રહ્મણોઽન્યત્ફલં ન હિ ।
બ્રહ્મણોઽન્યત્તૃણં નાસ્તિ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૫૫॥

બ્રહ્મણોઽન્યત્પદં મિથ્યા બ્રહ્મણોઽન્યન્ન કિઞ્ચન ।
બ્રહ્મણોઽન્યજ્જગન્મિથ્યા સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૫૬॥

બ્રહ્મણોઽન્યદહં મિથ્યા બ્રહ્મમાત્રોહમેવ હિ ।
બ્રહ્મણોઽન્યો ગુરુર્નાસ્તિ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૫૭॥

બ્રહ્મણોઽન્યદસત્કાર્યં બ્રહ્મણોઽન્યદસદ્વપુઃ ।
બ્રહ્મણોઽન્યન્મનો નાસ્તિ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૫૮॥

બ્રહ્મણોઽન્યજ્જગન્મિથ્યા બ્રહ્મણોઽન્યન્ન કિઞ્ચન ।
બ્રહ્મણોઽન્યન્ન ચાહન્તા સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૫૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તં બ્રહ્મૈવ સર્વં પ્રકરણનિરૂપણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૧૫ । ૧-૬૧॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 15 . 1-61..

Notes :
Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita.
Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

*Ribhuproktam Brahmaiva Sarvam Prakarananirupanam*
pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*